# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ५ | गुणाः – ५० |
| विषयः – नव्यन्यायः | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – सिद्धान्तलक्षणम् | |

सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**
१ संसर्गाभावत्वम्।
२ अत्यन्ताभावः।
३ प्रतियोगिव्यधिकरणत्वम्।

**प्रश्नः २ विषयतायाः वृत्त्यनियामकत्वे सम्बन्धत्वानिवेशपक्षे दोषं प्रतिपादयत।**

**प्रश्नः ३ संसर्गाभावमात्रोक्तावपीति दीधितिं व्याख्यात।**

**प्रश्नः ४ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**
१ ज्ञानवान्द्रव्यत्वादित्यत्र समवायेन ज्ञानादेः अतिव्याप्तिं दर्शयत।
२ अव्याप्यसाध्यकव्यभिचारिणं व्याख्यात।
३ सम्बन्धभेदेन प्रतियोगितानिवेशे प्रयोजनम्।

**प्रश्नः ५ यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः तदनवच्छेदकमिति दीधितिं विशदयत।**

**प्रश्नः ६ तादात्म्यसम्बन्धेन व्याप्त्यनभ्युपगमे का क्षतिः? विवृणुत।**

**प्रश्नः ७ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**
१ कालो घटवान् एतत्कालत्वादित्यत्र अव्याप्तिः।
२ कालिकसम्बन्धः।
३ विशिष्टं शुद्धान्नातिरिच्यते।

**प्रश्नः ८ लक्षणे स्वरूपसम्बन्धविशेषरूपाभावस्य आवश्यकत्वं यथा दीधितिं व्याख्यात।**

**प्रश्नः ९ 'संयोगसामान्यञ्च न यत्किञ्चिद्द्रव्यावृत्तीति वाच्यम्' विवृणुत।**

**प्रश्नः १० निम्नलिखितेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखत।**

१ अव्याप्तेः लक्षणं किम्?

२ घटस्य कालिकसम्बन्धेन वृत्तित्वं कुत्र?

३ का नाम व्यतिरेकव्याप्तिः?

४ द्रव्यं गुणकर्माण्यत्वे सति सत्त्वादित्ययं सद्धेतुरसद्धेतुर्वा?

५ उद्देश्यवचनं पूर्वं...........।। पूरयत।

६ को नाम ध्वंस?

७ कः महाप्रलयः?

८ अत्यन्ताभावलक्षणं किम्?

९ समवायेन वह्नेरधिकरणं किम्?

१० वह्निमान् धूमादित्यत्र हेतुतावच्छेदकसम्बन्धः कः?

११ समवायेन ज्ञानाधिकर किम्?

१२ मणिकारोक्तं सिद्धान्तलक्षणं किम्?

१३ सिद्धान्तलक्षणे प्रथमयत्पदेन किं ग्राह्यम्?

१४ नव्यन्यायप्रवर्तकः ग्रन्थः कः?

१५ दीधिकारत्वेन प्रसिद्धिः आचार्यः कः?

****